श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ ऊर्ध्वपुण्ड्रध्यानश्लोकाः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

# ॥ ऊर्ध्वपुण्ड्रध्यानश्लोकाः ॥

ललाटे सततं देव्या श्रिया सह विराजितम्।
चतुश्चक्रं नमस्यामि केशवं कनकप्रभम्॥ १॥

अमृतोद्भवया देव्या समाश्लिष्टम् अथोदरे।
नारायणं घनश्यामं चतुश्शङ्खं नमाम्यहम्॥ २॥

नित्यं कमलयाश्लिष्टं हृदये करुणाम्बुधिम्।
माधवं मणिभङ्गाभं चिन्तयामि चतुर्गदम्॥ ३॥

देव्या च चन्द्रशोभिन्या मम कण्ठे विराजितम्।
चन्द्रभासं चतुश्शार्ङ्गं गोविन्दम् अभिसंश्रये॥ ४॥

विष्णुपत्न्याख्यया देव्या कुक्षौ दक्षिणपार्श्वगम्।
विष्णुं चतुर्हलं वन्दे पद्मकिञ्जल्कसन्निभम्॥ ५॥

वैष्णवीसञ्ज्ञया देव्या कलितं दक्षिणे भुजे।
चतुर्मुसलम् अब्जाभं संश्रये मधुसूदनम्॥ ६॥

कण्ठस्य दक्षिणे पार्श्वे वरारोहाधिपं प्रभुम्।
अग्निवर्णं चतुःखड्गं भावयामि त्रिविक्रमम्॥ ७॥

हरिवल्लभया देव्या वामकुक्षौ स्थितं हरिम्।
वामनं बालसूर्याभं चतुर्वज्रं विभावये॥ ८॥

वामबाहौ महाबाहुं शार्ङ्गिण्याः पतिमव्ययम्।
श्रीधरं पुण्डरीकाभं चतुःपट्टं समाश्रये॥ ९॥

देवदेविकया देव्या वामकण्ठे विभासितम्।
चतुर्मुद्गरम् अभ्येमि हृषीकेशं तटित्प्रभम्॥ १०॥

www.prapatti.com

कटिमध्यगया देव्या महालक्ष्म्या विराजितम्।
पञ्चायुधं पद्मनाभं प्रणमाम्यर्करोचिषम्॥ ११ ॥

काकुदे सुरसुन्दर्याः पतिमद्भुतरूपिणम्।
दामोदरं चतुःपाशं इन्द्रकोपनिभं भजे॥ १२ ॥

सर्वेषामखिलाभीष्ट फलदाश्लिष्टविग्रहम्।
वासुदेवमुपासेऽहं पूर्णेन्द्वयुतसन्निभम्॥ १३ ॥

॥ इति ऊर्ध्वपुण्ड्रध्यानश्लोकाः सम्पूर्णा ॥

www.prapatti.com